THE

# SADGURUSARVASWAM

CALLED

# "ARBHĀHWASWAMICHARĀṆABHĀRAṆUM"

BY

VAIDYŌPĀKHYA NĀRĀYAṆA KAVI

WITH INTRODUCTIONS OF

MR. RĀMA MĒNŌN, M. A.

AND

PÂTANJALĀDI BHĀSHYĀBHDIPĀRĪNA

PT. KRISHṆA SHÂSTRI

AND PUBLISHED BY

ĀRAMPIL GŌVINDAN UṆṆITTĀN.

---

BENARES:

PRINTED AT THE M. S. P. S. PRESS.

---

1910.

# INTRODUCTION.

The subject of this brief Biography is a very remarkable personage. He has caused the spiritual awakening of several persons of high intellectual capacity. His learning, intellectual acumen, powers of discourse, and calm and beneficient wisdom are wellknown to all who have had occasion to be acquainted with him. I have not been very intimate with him. Yet, from what I know, I have learned to revere him as a sage who has influenced for good many remarkable men in the country of his birth. His scholarship in Sanskrit and the Dravidian Languages is wellknown and has been utilised by several notable gentlemen. Calm courage of thought and definiteness of opinions are distinctive marks of the Swami. In behaviour, he is very modest and gentle. He is a true gentleman.

It has been the misfortune of the Swami's Countrymen that they have not been as much benefitted by his influence, as is to be expected from his real greatness. A faithful and detailed account of his life is sure to enlarge the circle of his influence and to benefit our countrymen by

the light of his profound wisdom. For these reasons, I warmly welcome the present booklet, though it is a mere sketch of the Swami's life, and look forward to a fuller Biography from the pen of some one of his able disciples.

G. RAMAN MENON, M. A.
Assistant Inspector of Schools,
Muvattupuzha Travancore

---

# भूमिका ।

इह खलु बालाहूस्वामिचरणाभरणं नाम रसिकजनमनोरञ्जनसरलरीति सर्गत्रयात्मकं किञ्चन चरितनिबन्धनं निबद्धमनेन कविना । अत्र च कथानायकत्वेनाभिषिक्तः सारस्वतांभोधिकुम्भीकुमार इति महानुभावधौरेय इति ब्रह्मविद्वर इति चोद्घुष्याखिलागमपारावारपारदृश्वभिः प्रसन्नगम्भीराशयैर्योगारूढैश्च नित्यंखन्यमानो मनीषामहानिधिरित्युक्तोऽप्यत्युक्तिशंकास्कन्दितहृदयता मा किञ्चिदपि भूद्विदितवेद्यानां शूर्पन्यायानुसारिणां मान्यमहाशयानाम् । सर्वदर्शनानां समरसतां, अहिंसायाः परमधर्मताञ्च सयुक्त्यवष्टंभं स्थूणानिखनन्यायेन व्यवस्थापयितुं जरद्दुरुक्तिमतान्युट्टंकितुंच प्रवृत्ता हैहयबाहाविधृतविमुक्तरेवाप्रवाहनिरर्गलगभीरमनोहरा गीरिदमीया गीष्पतेरपि न शङ्क्यत इति, एतदुपन्यासविरचनान्यवलोकितवतां विशदतममेव भवेत् ।

एते तावदाधुनिका इत्येतावता बहिःस्वरूपसाक्षात्कारमात्रेण न तिरस्काराहंतामावहेयुर्गुणोत्तराणां सारान्वेषिणामिति विनिश्चिनुमः । एतैः संकलिता निबन्धा लोकोत्तरा अमूल्याश्च यद्यप्यमुद्रिततया प्रायोऽभिज्ञानामीक्षणपथमनवगाढा एव वर्तन्ते कस्यापि हेतोरिति विस्मयनीयमेव। अत्र चैतादृशसुश्लोकचरिते हठयोगराजयोगकल्पचर्यादिकमपि वेदान्तविचारं पुरस्कृत्य प्रत्यपादि प्रणेत्रा । यद्यदत्र वर्णितं तत्तत्प्रामाणिकैतद्वयस्यादिमुखात् तन्मुखादिव यथावल्लब्धं कथाशरीरमवलंब्यैवेति विदां कुर्वन्तु सहृदय धुरीणाः । अयं च कवयिताऽभिनववाग्भट इति ख्यातस्य विद्वच्छिखामणेः पर्पराजवंशमुक्तामणेः, (वृद्ध) राजराजवर्मदेवस्य गुण्यः प्रियशिष्य इति विजानीमः । अन्यच्च स्फुटीभविष्यति रचनावलोकनेनेति शिवम् ॥

सनातनधर्मपाठशालायां संस्कृताध्यापककृष्णशास्त्री

२६ ॥ ३ ॥ १०८५ ॥

श्रीः ।

# 'बालाह्वस्वामिचरणाभरणम्'

अस्त्यात्मविद्यामृततृप्तिशाली बालाभिधानो भगवान्मुनीन्द्रः यत्स्वामिनो भूवलयप्रसिद्धं विभाति चद्दम्पयपराभिधानम् ॥ १ ॥ तपोधनानामधुनातनानां सनातनानन्दघनानघानाम् । सुधीश्वराणां प्रथमाभिधेयो यः साधुलोकस्य मनो धिनोति ॥ २ ॥ अच्छिन्नकारुण्यनिवासभूमिं सच्चित्सुखाखण्डरसप्रमोदम् । वेदान्तिनं यं शरणं व्रजन्तः संसारवार्द्धिं प्रतरन्ति सन्तः ॥ ३ ॥ अन्यादृशो धन्यतमस्य विद्वत्सन्यासिनो वेदमयस्वरूपा । विभाति यस्याननपद्मवासा वागीश्वरी विस्मयनीयवृत्तिः ॥ ४ ॥ प्रपञ्चतत्वप्रतिपादकार्थसमर्थकं सञ्चितधर्मसारम् । यतीश्वरस्य स्वयमेव वक्त्रादुदञ्चति प्रश्रयि यस्य वाक्यम् ॥ ५ ॥ परिस्फुरच्चित्रकथापवित्रस्फुटाक्षरा यस्य गिरां विलासाः । सामान्यतस्त्वानृपमाऽविपालान्क्षेमाय चात्र प्रसरन्ति नित्यम् ॥ ६ ॥ अशेषनिर्धूतसमस्तमायाविशेषविभ्रान्तिविकारधारा । जयत्यहो यस्य कटाक्षवीक्षा

मोक्षार्थिभिः सन्ततमर्थ्यमाना ॥ ७ ॥ अखण्डसं-
विल्परमप्रमोदमहार्णवस्य स्वमनोगतस्य । फेनप्रभा
निर्मलवक्त्रपद्मप्रसत्तिरुन्मीलति यस्य नित्यम् ॥ ८॥
पारंगतैर्नैगमवारिराशेर्विशेषतः पण्डितकेसरीन्द्रैः ।
अपास्य दूरे विषयाभिलाषमुपास्यते यस्य पदार-
विन्दम् ॥ ९ ॥ भिक्षोः सुखेन भ्रमतः सदैव दिक्षव-
प्रतीक्ष्वं क्वचनस्थितस्य । यस्याधिकाश्चर्यकरीह चर्या
कुर्यान्न केषां विदुषां प्रमोदम् ॥ १० ॥ श्रीशङ्करा-
चार्यमुनीन्द्रमुख्यविख्यातजन्मातिपवित्रितेस्मिन् ।
नीवृत्यभूच्छ्रीमलयालनाम्नि यो लब्धवर्णः किल
लब्धजन्मा ॥ ११ ॥ श्रीवञ्चिभूवासवराजधानीसा-
न्निध्यसंशुद्धविभूतिपूर्णम् । कञ्चित्तमं ग्राममसोघ-
पुण्यग्रामं यदीयावतरश्चकार ॥ १२ ॥ सङ्गीतसा-
हित्यसुधाब्ध्यगस्त्यस्वातीभजश्रीकुलशेखराह्वात् ।
वैदुष्यसम्भावनयाऽऽत्तवृत्तिः स्वानन्दसन्तुष्टमना
गुणाब्धिः ॥ १३ ॥ श्रीमान्सुधोरुन्मणिनायनाचा-
र्संज्ञोऽग्रगण्यो नियतेन्द्रियाणाम् । यस्यान्वयं
पूर्वमलंचकार नारायणाह्वोऽथ च सिद्धमौनी ॥ १४॥
निध्यभ्रनन्देन्दुमिते यतीन्द्रः स वैक्रमेऽब्दे भुवि
पुण्यराशिः । श्रीनङ्गदेव्यामजनिष्टसाध्व्यां प्राग्देव-
हूत्यामिव वासुदेवः ॥ १५ ॥ स शैशवेऽप्येषवयस्य-
तन्द्रं सान्द्रं स्वचैतन्यकलाविशेषम् । प्रकाशयन्सर्व-

जनान्तरंगं तरङ्गयामास मुदां प्रचारैः ॥ १६ ॥
बाल्याद्यवस्थासु महाशयस्य तस्याभवन्देशिकतां
प्रपन्नाः । प्रशस्तविद्याश्रुतचुञ्चवोऽन्ये सुब्बाजटा-
पाठिमुखाश्च तज्ज्ञाः ॥ १७ ॥ पुनः स्वयं स्वप्रति-
भाविशेषप्रशस्तिमास्तिक्यमतप्रसन्नाम् । प्रकाशय-
न्वेदविभेदपाठं दृढं करोति स्म महामतिः सः ॥ १८ ॥
इतस्ततो भारतभूमिभागान्भोगानुरागेण विना
मनीषी । सपर्यटन्सञ्चितपूर्वपुण्यपूरश्चिरं साधु नि-
नाय कालम् ॥ १९ ॥ अथ क्रमेणैष बुबोध भद्रां तां
द्राविडीं व्याकृतिसारमुद्राम् । बाल्यात्प्रभृत्या-
र्यवचोविपश्चीत्रिस्कन्धतन्त्रीसरणिप्रवीणः ॥ २० ॥
तदन्तरेऽसौ द्रविडोपवासं समाचरंस्तत्र पवित्र-
कृत्यः । श्रुत्यन्तचर्चासु निविष्टचित्तस्तत्तत्प्रमेयाणि
पपाठ नित्यम् ॥ २१ ॥ शाखोपशाखं निगमप्रपञ्चं
सञ्चिन्तयन्सन्ततमन्तरङ्गे । विप्राग्रगो विप्रतिपत्ति-
वृत्तिनिरासचातुर्यधुरां दधार ॥ २२ ॥ तस्यां दशा-
यां किल दुःखजालदुश्चेष्टितं तस्य हृदन्तराले । बभूव
साधोरपि दूरदुष्टप्रारब्धसंस्कारविशेषशक्त्या ॥ २३ ॥
महामनस्कः स्वमनोविकारं जरीहरीति स्म तदा
तदाऽयम् । अष्टाङ्गयोगागमसंप्रदायमप्यध्यगीष्ट
प्रणतेषूदारयी ॥ २४ ॥ स सांख्यपातञ्जलदर्शनोक्त्योर्न
श्रुत्यनुग्राहकतेतिकृत्वा । संत्यज्य ते पावनमात्म-

योगं तं भावनाख्यं विदधे बुधेन्द्रः ॥ २५ ॥ स षण्मतानां द्वितयस्य सूक्ष्मरहस्यवेत्तातिपवित्रकृत्यः । यियासुरासीदथ योगमार्गशाखां चिशाखांघ्रिसरोजभक्तः ॥ २६ ॥ तपश्चचाराथ मनोविचारपथप्रचारेण विना मुनिः सः । अनर्गलानन्दसुधासमुद्रतरंगसंक्रीडनसंप्रवृत्तः ॥ २७ ॥ क्रमादनर्घां हठयोगविद्यामवद्यहीनामतियत्नसाध्याम् । अशीलयत्सोऽल्पदिनैर्मनीषो वशीचकारात्र वशी च सिद्धिम् ॥ २८ ॥ क्रियासु सर्वास्वपि साधु 'संम्यग्योगं' समालोक्य विशेषतोऽसौ । सिद्धोऽभवद्धौतिकबन्धवस्तिमुख्यासु विख्याततमासु योगी ॥२९॥ प्लाविन्यभिख्यामलकुम्भकादियोगक्रमाभ्यासकलासु नित्यम् । मुद्रासु भद्रास्वपि मूलबन्धमुख्यासु संसिद्धिमवाप सैषः ॥ ३० ॥ प्राणानिलं चापि हठादपानं संयोज्य संधार्य विपश्चिदार्यः । दध्यौ स्वमात्मानमखण्डसंविद्रूपं स पाश्चात्यभवोपलभ्यम् ॥ ३१ ॥ चान्द्रीं सुधामेव पिबत्यजस्रं तथापि पालाशकलायमुख्यम् । सुधादिकिम्पाकपदान्तकल्पं लेढि स्म चागस्त्यविधानतोसौ ॥ ३२ ॥ धरातले सत्यगिरो बुधेन्द्रास्तन्द्रां विना योगिवरस्य तस्य । ऐश्वर्यसिद्धिव्यवहारलीलाविशेषमप्याहुरिहानुवेलम् ॥ ३३ ॥ स्वप्नोपमानः सुतरामसारः

संसारपूरः कलुषोतिकृच्छ्रैः । आचार्यचूडामणिरे-
वमात्मन्यालोच्य सोऽभूत्परमात्मनिष्ठः ॥ ३४ ॥
महामनस्को महितामहिंसां सत्यं तथाऽस्तेय मपा-
स्तसङ्गः । सद्ब्रह्मचर्यं त्वपरिग्रहं च यमान्स जग्राह
कुशाग्रबुद्धिः ॥ ३५ ॥ स शौचसन्तोषतपांसि नित्य-
स्वाध्यायदेवप्रणिधानवृत्तो । प्रस्तौमभक्त्या निय-
मानिमांश्च निर्विघ्नमूरीकुरुते स्म सूरिः ॥ ३६ ॥
विराजमानप्रतिभाविशेषस्थेयस्त्वतस्तत्त्वविदां व-
रिष्ठः । स राजयोगाभ्यसने प्रवृत्तः प्रवृद्धसामर्थ्य-
भरं बभार ॥ ३७ ॥ लक्ष्यं परं ब्रह्म धनुश्च तारं प्रमा-
दहीनं प्रणयन्प्रबुद्धः । आत्माभिधानं शरमाशु धृत्वा
विव्याधचैकत्वमवाप सोयम् ॥ ३८ ॥ अपुण्यवल्लो-
कगणानवाप्यां गोप्यां स राजाह्वययोगभूमिम् ।
अवाप सोमातिगबुद्धिसक्तिप्रयुक्तिसाध्यां विबुधै-
श्च सेव्याम् ॥ ३९ ॥ युक्तस्य योगेषु सदैव जीव-
न्मुक्तस्य मुक्ताखिलदुष्कृतस्य । अस्येषुर्देवः प्रणता-
र्तिहारी श्रीकार्तिकेयो निगमार्थमूर्तिः ॥ ४० ॥
संख्यावन्मूर्द्धाभिषिक्तस्य तस्य स्कन्दः स्वाम्यन्ता-
र्यगुर्वाह्वयस्य । आत्मौपम्याद्देवसेनापतित्वं विस्मृ-
त्येवातिष्ठते हृत्सरोजे ॥ ४१ ॥ ब्रह्मादिदैवतगणा
यदनुप्रवेशाद्व्यापारवन्त इह सर्गपरम्परासु । ध्याया-
म्यहं तदिह 'षण्मुखदासनाम' योगिप्रकाण्डमपरि-

स्खलितं महोऽन्तः ॥ ४२ ॥

इति प्रथमः सर्गः ।

---

मुमुक्षुलोकैरखिलैरनूनं सम्पादनीयामतिकृच्छ्रलभ्याम् । स साधनानां चतुरश्चतुर्णां पूर्णां च सम्पत्तिमवाप तूर्णम् ॥ १ ॥ कालेऽथ तस्मिन्द्रविडेष्वमुष्मिंस्थितिं दधत्यागमवारिराशौ । कश्चित्परानन्दरसोऽस्य काकतालीयनीत्याऽक्षिपथं प्रपेदे ॥ २ ॥ मुनेरदृष्टश्रुतपूर्वनाम्नस्तस्मान्महावाक्यमयोपदेशः । लब्धोऽन्तराविश्य हृदो विभेद ग्रन्थिं स एषोऽस्य महाशयस्य ॥ ३ ॥ जितेन्द्रियः शुद्धविविक्तदेशस्थितोऽन्वहं निर्मलचित्तवृत्तिः । भेदत्रयातीतमनन्तरूपं व्यभावयद्ब्रह्म सदा मनस्वी ॥ ४ ॥ रागादिदोषोज्झितचित्तवृत्तेरज्ञानतामिस्रभरेऽपनीते । कालाम्बुवाहापगमेंऽशुमालीवात्मा स्वतस्तस्य मुनेश्चकाशे ॥ ५ ॥ देहात्मिकां बुद्धिमपास्य नित्यं सत्यं चिदानन्दरसस्वरूपम् । आत्मानमालोकत केवलं स यथा करस्थामलकं मुनीन्द्रः ॥ ६ ॥ दोषावहां बाह्यसुखप्रसक्तिं । मुक्त्वाऽहमाऽवीतकुमारकल्पः । अन्तः वयं युक्तमरंस्त योगी त्यागी च वायुप्रतिमश्चचार ॥ ७ ॥ सदा चिदानन्दमयस्वरूपनिरूपलध्यानसमाधियोगात् । जगाम तादात्म्यमसौ महात्मा प्रह-

षितज्ञानिजनान्तरङ्गः ॥ ८ ॥ 'कर्माऽविरोधेन' तमःस्वभावां वर्ज्यामविद्यां विनिवर्तयेन्न । विद्यैव तन्नाशकरी निषेव्येत्यमिज्ञवर्यः स तु निश्चिकाय ॥९॥ कूटस्थनित्यामलमद्वितीयमात्मानमात्मन्यवलोक्य साक्षात् । शुद्धान्तरंगः स्फुटपञ्चकोशज्ञानात्स विद्यामयतामयासीत् ॥ १० ॥ कर्मैव कायादिजनुर्निदानं हेतुश्च तस्यास्तितरामविद्या । तद्यापनायातिविशुद्धरूपा विद्येति वेत्तीह मुनीश्वरोऽसौ ॥ ११ ॥ अज्ञानमूलोदितरागवृत्तिसन्तानसम्मिश्रतयैव कर्म । दोषावहं तद्भवसम्भवश्चेत्यज्ञायि तेनात्मविदां वरेण ॥ १२॥ सदा शरीराद्यभिमानजन्या सर्वक्रियाणां पदली नराणाम् । तथाप्यहङ्कारधुरानिरासात्सिध्येच्च विद्येति सुधीर्बुवोध ॥ १३ ॥ कार्याणि सर्वाणि विमुच्य नित्यं सुदुर्दमान्तःकरणप्रवृत्तिम् । स्वात्मन्यवस्थाप्य गरिष्ठनिष्ठास्थैर्यं सदोरीकुरुते स धीरः ॥ १४ ॥ भूतं पुनर्भावि च कर्मजातं जातप्रबोधः परचिन्मयाग्नौ । हुत्वा स्वदेहंपरिकल्पयंश्च प्रारब्धशेषाय मुनिः स आस्ते ॥ १५॥ द्रष्टा घटस्यास्ति घटाद्विभिन्नो देहादिकस्यापि तथा तदन्यः । तस्माच्छरीरं न च भौतिकोऽहं मोहं विहायेत्थमवैत्स विज्ञः ॥ १६ ॥ प्राणादिवर्गः करणानि बुद्धिर्मनश्च तद्वृत्तय एव सर्वाः । अहं न तद्वृत्तिदृगत्रसाक्षादा-

त्मानमेवं बुबुधे बुधोऽयम् ॥ १७ ॥ अनादिकाऽनिर्वचनीयरूपा समस्तकर्मप्रकरप्रसूतिः । सा कारणोपाधिरितीर्यमाणा दूरीकृताऽनेन जवादविद्या ॥१८॥ इदं जगत्सर्वमसत्यमेव भ्रमात्मकं रज्जुभुजङ्गतुल्यम् । अध्यस्तमानन्दरसैकनिष्ठे निरैक्षि तत्स्वात्मनिचेत्यनेन ॥ १६ ॥ प्रपञ्चसत्यत्वविशिष्टबुद्धिरध्यासतोऽज्ञानबलेन नूनम् । अध्यासहेतुर्निजकर्मजातदुर्वासना सेति हुता चिदग्नौ ॥ २० ॥ यस्यैव सान्निध्यबलेन नूनं प्राणादयो व्यापृतिशक्तियुक्ताः । सोहं परं ब्रह्म न चान्यदेवं बोधः समिन्धेऽस्य मुनीश्वरस्य ॥ २१ ॥ मनो मदीयं गतमाप्तमत्र स्थिरीकृतं चैवमवैति येन । सोहं परानन्दमयोऽविकार इत्यात्मवानात्मनि सन्दधेऽसौ ॥ २२ ॥ मेघेषु धावत्सु यथा सुधांशुर्धावन्निवाभाति तथा मुनीन्द्रः । स्वार्थेषु धावत्सु समेन्द्रियेषु व्यापारकारीव कदाचिदास्ते ॥ २३ ॥ अलोकतासावमलात्मरूपमभेदभावाज्जगदन्तरस्थम् । घटे मठे व्योम न भिन्नमेतत्तत्वं स्फुटं चास्य हृदि प्रवृत्तम् ॥ १४ ॥ जीवात्मनात्राथ तनुं प्रविश्य तथा नियन्तृत्वमवाप्य भूयः । अनामयः साक्षितया निलीनो यः सोहमेवेति स बुध्यते स्म ॥ २६ ॥ आराध्यपादस्य मुनेरमुष्य शिष्यत्वयोगेन परं विशुद्धाः । प्रबुद्धतत्वा यतयोपि के चित्सरूप-

मुक्ता विजयन्ति सन्तः ॥ २६ ॥ तच्छात्त्रतां शास्त्र-
विदः प्रपन्ना धन्या धरण्यामिह पण्डिताग्रयाः ।
सान्द्रावबोधामृतसाररूपो अरूपमुक्ताः स्म भवन्त्य-
नेके ॥ २७ ॥ स जीवकारुण्यनिरूपणाख्यं प्रबंधरत्नं
प्रबबन्ध योगी । यदीयपाठावगमेन हिंसाशंसा परां
शान्तिमुपैति भूमौ ॥ २८ ॥ पुनः पुनर्जन्मनिरूप-
णार्हं बंहिष्ठयुक्तिप्रसरप्रसन्नम् । धन्यश्चकाराशु
जगत्स्वभावजन्यप्रकारज्ञतयैष विज्ञः ॥ २९ ॥ तथा
चिदाकाशलयाभिधानं निबन्धरत्नं निरमायि तेन ।
अदः यरं मुक्तिपदाध्वगानां निरन्तरानन्दभरं त-
नोति ॥ ३० ॥ ततः परं किंचन जातिभेदनिरूप-
णाख्यं विपुलं प्रबन्धम् । मुदाऽकरोच्चारुतरं समस्त-
वर्णस्वरूपप्रतिपादकं सः ॥ ३१ ॥ वेदाधिकारप्रनि-
रूपणाद्या विद्याऽभिधनाऽनेन मुनीश्वरेण । ग्रन्थाः प्र-
णीता विविधप्रकाराः सारार्थसम्पत्प्रसराभिरामाः
॥ ३२ ॥ सद्वस्तुसाक्षात्करणात्परस्तात्प्रस्तोमकारु-
ण्यमहार्णवेन । अनेन भूम्ना स्वपदारविन्दपूताः
कृताः सन्ति दिशां विँभागाः ॥ ३३ ॥ परोपकार-
व्रतवद्धदीक्षः प्रेक्षावतामग्रगतिर्यतीन्द्रः । इहाति-
वर्णाश्रमिभावमाप्तः प्रपन्नलोकार्तिहरः समिन्धे
॥ ३४ ॥ स्वमातृवंश्येन वराऽग्रजेन श्रीकेशवाख्येन
निरूढमोदम् । संरक्षितोऽयं सकलासु चर्यास्वव्या-

हृत्तं तृप्तिभरं बभार ॥ ३५ ॥ उवास धीरो द्रविडा-ख्यदेशनिवासतः शुद्धतरान्तरंगः अनन्तपुर्यां बुध-लोकवर्यसपर्ययाऽऽसादितनित्यवृत्तिः ॥ ३६ ॥ स-ह्याद्रेः पश्चिमस्यां तटभुवि नेदुमङ्ङाटनाम्नि प्रदेशे पश्चात्स्वच्छान्तरात्मा निरुपमविभवे वामनाख्ये पुरे च। सोऽयं विद्यामिताब्दावधि सुखमवसत्सच्चि-दानन्दरूपे ब्रह्मण्याधाय चेतस्तदुपरि निखिलप्राणि-नां क्षेमकारः ॥ ३७ ॥ "श्रीकालठिग्रामभुवोऽविदूरे स कोटनाटाख्यवनप्रदेशे । निर्माय शुभ्रां मठिकां स्वशिष्यैः सहावसत्कञ्चन कालमत्र ॥ ३८ ॥ हरि-हरधरणीसुरेन्द्रशर्माद्यधिगतसर्वनयैश्च साधुलोकैः। परिचरणविधेर्मुनिः प्रतुष्टः सुखमवसच्छरदां च विंशतिं सः ॥ ३९ ॥ पश्चाद्व्याघ्रालयाह्वे त्रिनदपदनुते सांबसद्मोपकण्ठेऽवस्थानं श्वेत्तुमानूरभिधसुविषये-चाकरोद्वीतरागः । सोऽयं तत्तन्नगर्यां कतिपयदिन-मासर्तुवर्षाणि नीत्वेदानीं ब्रह्मामृतास्वादनपरहृ-दयो वर्तते शेषपुर्याम्" ॥ ४० ॥ यद्वाणी ब्रह्मवि-द्यामृतरसलहरीगुम्फगंभीरभावा भावातंकाङ्कुरं संहरति किरति चानंदपीयूषयूषम् । पुष्यद्द्वैदुष्यहृ-द्यन्मधुरिमगरिमाभोगसम्पत्समृद्धा सांद्रानंदामृतं तं मुनिमनुकलयेऽभीभिधानं महान्तम् ॥ ४१ ॥

इति द्वितीयः सर्गः ।

"अन्यादृग्गहनतमार्थयुक्तिवादप्रस्तावश्रुतिशतमूर्धतत्ववेदी । वेदांगप्रकरमहार्णवावगाहाद्यामोहैर्विरहितशेमुषीविकासः ॥ १ ॥ सच्चेतोहरमकरन्दसान्द्रधारासौन्दर्यप्रतिभटवाग्विलासपूरः । कारुण्यामृतरसिकः सदात्मसंवित्स्वारस्यो विविध[१]महाप्रबंधकर्ता ॥ २ ॥ योगीन्द्रो विलसति नीलकण्ठतीर्थस्वाम्यात्माश्रम इति योगनामधेयः । अस्यान्तेवसदृषिपुङ्गवेषु धन्यः श्रीसीरध्वज इव यज्ञवल्कसूनोः" ॥ ३ ॥ श्रीकण्ठस्मरणविधूतपापबन्धः शान्तात्मा सततलसच्चिदात्मनिष्ठः । सन्तुष्टो जयति सदाश्रयो यथार्थाभिख्यातः परमगुरोः प्रशिष्यवर्यः ॥ ४ ॥ आचान्ताखिलनिगमान्ततत्वसाराधा[२]रालैर्हृदि परचिद्रसैश्च तृप्ता । अर्यान्तद्विजकुलसंभवात्मयोगिन्याख्याता लसति विशिष्य यत्प्रशिष्या ॥ ५ ॥ "वात्सल्यान्मुनितिलकेन बालनाम्ना भूम्ना स्वां निकटभुवं सदैव नीतः । सूर्येणारुण इव देशिकः प्रसन्नः श्रीमानुल्लसति स पद्मनाभपूर्वः ॥ ६ ॥ विद्यावान्पटुधिषणाग्रणीः प्रवीणः कार्येषु स्फुटत-

१. एतत्कृता ग्रन्थाः—अद्वैतपारिजातकः, स्तवरत्नहारः, विषमृत्युंजयः । द्रष्टव्या टिप्पणी— पृष्ठे *

२ धारां लात्याददत इति—धारावद्भिरित्यर्थः ।

रनैपुणीधुरीणः। बाह्यात्मा परमगुरोरितीह लोकै-
रात्मीयैः सुदृढतरं विभाव्यमानः" ॥ ७ ॥ सङ्गीते
सकलजनानुमोदनीये साहित्ये निगमशिरः प्रपञ्च-
सारे। प्रावीण्यं किल दधती विभाति लक्ष्मीदे-
व्याख्या परमगुरोरमुष्य शिष्या ॥ ८ ॥ ईशानां-
घ्र्यमलसरोजसेवनेन प्रध्वस्तव्रजिनभरोऽस्ति सद्-
गुणाढ्यः। योगानां सदसि कृतासनः स गोविन्दा-
भिख्यः परमगुरोरमुष्य शिष्यः ॥ ९ ॥ आम्नायप्र-
करसमर्थितार्थवित्सुब्रह्मण्योपरि शिव इत्युदीत-
नामा। पुण्यात्मा शिवचरणारविन्दभक्तो युक्तान्तः
श्रुतिनिरतश्च यस्य शिष्यः ॥ १० ॥ सर्वज्ञैः सनक-
सनत्कुमारमुख्यैर्विख्यातैर्मुनिनिवहैः समर्चितां-
घ्रिः। दक्षास्यः शिव इव पूजितः स्वशिष्यैर्बालाह्वः
परमगुरुर्विराजतेऽसौ ॥ ११ ॥ मर्त्योऽसाविति मति-
मादधाति कृत्यं प्रत्यास्थां वहति चरत्यविघ्नमास्ते।
भुङ्क्तेऽन्नं विसृजति दग्धवस्त्रतुल्यं स्वां वृत्तिं न च
विजहात्यहो महात्मा ॥ १२ ॥ वाग्देवीस्तनयुगशी-
धुसिंधुपानान्मत्तेवापि च परमस्य देशिकस्य। धी-
वृत्ती रमत इदन्तया विमुक्ता स्वाभिन्नामलपरसं-
विदात्मनैव ॥ १३ ॥ अर्थिस्यः कथयति शुद्धवा-
ग्विलासैर्वेदार्थान्क्वचिदुगायति प्रसन्नः। संसत्सु
प्रथयति नित्यमेष साध्यं निर्वाणं महति मनुष्य-

जन्मनीति ॥ १४ ॥ कारुण्यात्कलयति चाऽसुरेशकीटं हृद्यन्तर्विमलमतिः स आत्मतुल्यम् । कल्याणं खलु जगतश्चरीकरीति प्रारब्धेतरदुरितं क्षयं प्रणेष्यन् ॥ १५ ॥ या संवित्सकलजगन्निदानभूता भूतानां हृदि परमार्थतो निलीना । साक्षात्पश्यति हि तदात्मनाश्रमस्तं सायुज्यं भुवि च भजन्नयं सदाऽऽस्ते ॥ १६ ॥ अभ्रान्तर्गणितमहांधकारतुल्यं चिद्व्योम्न्युद्ग्रथितमिदं प्रपञ्चभानम् । विस्मृत्यामलपरचित्स्वरूपसत्तामात्रोऽसौ जयतितरां सदेहमुक्तः ॥ १७ ॥ यज्ज्योतिर्निखिलजगत्प्रकाशकं स दृयो भावो निजपरिबोधमात्ररूपः । या तुष्टिः परसुखतुन्दिला च योगी स्वाधीनीकृतकुशलस्तदात्मनाऽऽस्ते ॥ १८ ॥ ब्रह्मज्ञैस्तदिति दृढं प्रगीयते यद्योगज्ञैर्जगति तथेश्वरश्च योऽसौ । सांख्यै र्या प्रकृतिरितीर्यते विमुक्तिं वैदेहीं भुविचभजंस्तदात्मनास्ते ॥ १९ ॥ या सत्ता लसति निजानुभूतिवेद्या चिद्विद्यामृतलहरी स्वयंप्रकाशा । ईशादीश्वरपरमेश्वरी स जीवन्मुक्तः सन्परमगुरुस्तदात्मनास्ते ॥ २० ॥ यद्वाचामविषय एव नेतिवाक्यप्रामाण्यात्परमधिगम्यते च धाम । तद्रूपः परसुखनित्यबोधलग्नः सोल्लासं भुवि रमते मुनीश्वरोऽसौ ॥ २१ ॥ अव्यादव्याजमोदोदयलसदनुकम्पानुसम्पातपूतस्थेयक्षेमप्रवाहावहमहितकटाक्षा-

लिराचार्यमौलेः। अस्मान्बालाभिधधैरवमथितस-
मिन्धानसन्तापचिन्ताबंधाधाभ्यन्तरंगान्तरविषय-
विषावेगमोहप्ररोहा ॥ २२ ॥ श्रीमद्धब्धिवसुन्धरा-
वरसकाशाल्लब्धसाहाय्यका विद्यन्ते भिषजश्चिकि-
त्सितमहाधर्मालयाधीश्वराः। एतेष्वन्यतमः परा-
मृतरसप्रेप्सापरिग्रस्तधीर्बालाभिख्यमुनीन्द्रसचरि-
तमत्राकार्षमेवंविधम् ॥ २३ ॥ धन्योहमिति मन्दो-
ऽयमविन्दं चरितार्थताम्। यन्मया सिद्धयोगीन्द्र-
वृत्तचर्चा व्यधीयत ॥ २४ ॥ भ्रमप्रमादस्खलितक्लि-
ष्टतादीह चेद्भवेत्। तत्सर्वं साधुभिर्विज्ञैः क्षम्यता-
मनुकम्प्यताम् ॥ २५ ॥ सुधाकरगुणाभ्रेन्दुमिते तु
शकवत्सरे। नारायणाख्यवैद्येन चरित्रदिमुद्धृतम् ॥
२६ ॥ बालाह्वस्वामिचरणाभरणीकरणादिदम्।
"बालाह्वस्वामिचरणाभरणं" नामतोपिच ॥२७॥

इति तृतीयः सर्गः ॥ श्रीषण्मुखदासनामकभ-
गवत्कुमारभट्टार-आर्यगुरुस्वामि-चरित्त्रं समाप्तम्॥

---

"आराधयाम्यसितकन्धरतीर्थपादयोगीन्द्र-
मुन्मिषितहृन्मयपद्मकोशम्। क्लेशापहं मम मनो-
मुकुरान्तरालप्रोद्भासिचारुचरणारुणपुण्डरीकम्॥"
नारायणवैद्यः।

---

इदं पुस्तकं टि० वेलप्पिल्ल टि० नाणुपिल्ल पि०
माधवपिल्ल इत्येतैर्मुद्रापितम्।

*** पं॰ बि॰ श्रीनीलकण्ठतीर्थस्वामिकृता ग्रन्थाः—**

श्रीसौभाग्यलहरी । (२) शिशुभगवत्यञ्जिका । (३) "श्रीयोगामृततरङ्गिणीस्तबकस्य—हरिभजनामृतम् । (४) विधुनवसुधाझरी । (५) विधुस्तव मधुद्रवः । (६) स्वात्मसुधाकरः । (७) योग (रहस्यकौमुदी) मञ्जरी । (८) अमृतकल्पलताख्या कैवल्यकन्दली" । (९) "स्वाराज्यसर्वस्वगुच्छकगत—अद्वैतकलाऽऽर्यांशती । (१०) हरिभक्तिमरन्दः । (११) आत्मादर्शः' । (१२) "संकल्पकल्पलतिकास्तबकस्य—दिव्यक्षेत्रादर्शः । (१३) लक्ष्मीकटाक्षमाला । (१४) अच्युतानन्दलहरी । (१५) अम्बाकृपाम्बुवाहः" । (१६) श्रीशिवामृतम् । (१७) प्रश्नोत्तरमञ्जरी । अन्यत्र शारीरकब्रह्म मीमांसाभाषावार्तिकं वेदान्तमालिकाद्याश्च ॥

एतदुपरि भुवनान्तविश्रान्तयशोभिर्विद्वत्प्रकाण्डै रचिता श्लोकाः तत्र तावज्जर्मनीसाम्राज्यान्तर्गत 'कील' सर्वकलाशालास्वध्यापकपदमलं कुर्वाणानां प्रोफेसर्ड्यूसेन्साहेबमहोदयानामयं श्लोकः—

ओम् ।

'यां भवान्प्रेषयामास योगामृततरङ्गिणीम् ।
स्वादिष्ठममृतं तस्याः सुखेन पीयते मया ॥'

देवसेनः ।

Dr. Paul Deussen
Prof. Kiel Germany.

दक्षिणापथस्थसरस्वतीगृहमिति प्रसिद्धपन्तलन्तुराजवंशावतंसविद्वन्मूर्धन्यपूर्वाषाढासंभूत सि.रामवर्मराजानामयमाशयः –

असितगलयतीन्द्र ? त्वत्कृतिः सत्कृताऽलं जयति कविकुलेन्द्रैः सादरं मेदुरार्था। मम नयनपथं च प्रापिताऽद्य त्वयैव प्रतिनवपदयोगप्रत्तकौतूहलैषा ॥ वैदुष्यं प्रकटीकृतं परमहो सीमातिमामि त्वया सर्वस्मिन्विषयेऽप्यनन्यकवितावैदग्ध्यसाधारणम्। तत्तद्व्याकरणप्रयोगपरम प्रौढिप्रकाशोदयात्किञ्चिज्ज्ञैर्मनसापि दुर्ग्रहतरा सैषाकृतिस्ते यतः ॥ २ ॥ सुप्तिङन्तपदचित्रमेलनमहत्तरार्थघटनाविधिस्फारपाटवहठाद्विपाटितकवीन्द्रगर्वगिरिकूटकः। अद्य सम्यगिह मामकीनहृदि भूरिमोदपरिवर्द्धनस्त्वं हृदाऽसि मम पण्डितप्रकर मस्तकास्थितिमनीयथाः ॥ ३ ॥ योगाभ्यासविधानमार्गपरमप्रावीण्यमप्युच्चकैस्तत्तद्दैवतभक्तिपूर्वकमहास्तोत्राणि चाहो तव। अद्वैताध्वनि सर्वलोकगहने सञ्चारचातुर्यकं सर्वं चैतदनन्यसूरिसुलभं वर्वर्ति सर्वोपरि ॥ ४ ॥ प्रतिपत्त्रप्रेषणे तु खिलंबोऽकारि यन्मया। तत्कारणं शृणुष्वाद्य वक्ष्ये सौजन्यभूषणः ॥ ५ ॥ त्वच्चर्मितप्रचुरपद्यमहार्थचिन्ताजाजायमानरसपायससिंधुमग्नः। तज्जन्यकोमलतरङ्गगणापविद्धः कालस्य किञ्चिदपि नैवगतिं व्यजानाम् ॥ ६ ॥ पुस्तकस्य त्रयं त्वादौ लब्धमद्य चतुष्टयम्। देवस्तुतिज्ञानयोगप्रश्नोत्तरमनूत्कटम् ॥ ७ ॥

## महाराज राजश्री—

बि॰ ए; बि॰ एल् बिरुदशालिविद्वद्वर एस्-वेङ्कटरमणार्यमहोदयाना-
माशयः—

आर्याः श्रोनीलकण्ठयमिवर्याः ॥

सविनयनतिशतनिचितं तत्रभवत्प्रीतयेऽस्तु पत्त्रमिदम् ।
श्रीवेङ्कटरमणेन प्रणमपुरस्कारतो लिखितम् ॥ १ ॥
अतियाताः षण्मासाः प्राप्य भवत्प्रेषितं हि कोशयुगम् ।
कार्यभरात्प्रतिलेखे चन्तव्यमिदं महन्ममालस्यम् ॥ २ ॥
विज्ञानौचत्यवतां सकलकलारत्नशिखरिणां भवताम् ।
काव्ये गुणदोषाणां सर्षपतुल्यो विवेचने कोऽहम् ॥ ३ ॥
श्रोनीलकण्ठरूपया हरिभक्तिमरन्दपूरिता काचित् ।
सौभाग्यबहुललहरी श्रीयोगाम्रततरङ्गिणी स्रवति ॥ ४ ॥
श्रुतिमधुराणि नितान्तं सपदि ज्ञानप्रदानि परिशील्य ।
रचनानि तत्रभवतां सम्मोदसमुद्रमग्नोऽहम् ॥ ५ ॥
बलवत्तमा हि वाञ्छा तथापि मे मानसेऽस्ति विज्ञातुम् ।
विदितोऽभूवं कथमिति तादृशाणां महीयसां भवताम् ॥ ६ ॥
भाग्यविशेषोऽकाण्डे करुणा वा कुमुदबन्धुचूडस्य ।
मध्यस्थसखिमणेर्वा कस्यापि भवेदुपह्लादेतत् ॥ ७ ॥
सौहार्दमत्रवतामुपलभ्यानन्दतुन्दिलं स्वान्तम् ।
लेखप्रतिलेखमुखाद्विवर्धतां तदिति शङ्करं नौमि ॥ ८ ॥

Triplicane, Madras:
22nd March 1906. } (Sd.) S. Benkataramanan.

श्रीशैलाब्धीशसंस्थापितां ग्लमहापाठशालायां संस्कृताध्यापक–नाममाहात्म्यादिबहुग्रन्यकर्तृवैयाकरण ए–नारायणशास्त्रि कृताः श्लोकाः——— कलियुगविभवेन ह्यांग्लभाषा प्रवृत्ता निखिलजगति मर्त्याः कुक्षिपूर्त्येककामाः परमपदयियासालोलधीमद्भिरग्र्यं त्विदमतिगहनार्थं केविजानन्ति विद्वान् ॥ २ ॥ तदपि सरसमेतद्रम्यगंभीरभावं बुधवरहृदयाब्धोल्लालनं युष्मदीयम् । स्तुतिमयकृतिजातं संपनीपद्यतां द्रागखिलमनुजमोदायेति धीमन् प्रतीमः ॥ नीलकण्ठविबुधेन निर्मितं तेन चैव दयया समर्पितम् । शब्दशुद्धिरससद्गुणाकरं पुस्तकं तदिह मामरञ्जयत् ॥ ३ ॥ ज्ञानभक्तिरसवर्धकं नृणां नालिकेरपरिपाकरीतिमत् । भावगर्भकपदैरलंकृतं कस्य मानसमिदं न रञ्जयेत् ॥४॥

CALICUT :<br>
1st December 1905. } (Sd.) Pt. NARAYANA SASTRIAR.

अयि भोः स्वामिनस्तवभतां भवतां निसर्गसरसा सुशब्दसुभगा भारती मामतितरामानन्दयति । विदितवेद्यानांगतस्पृहाणां भवादृशां करुणादृष्टिर्यदि पतति यस्मिन्कस्मिंश्चपि पूरुषे तर्हि स एव धन्य इति दृढविश्वासादहं कृतार्थो भवामि । भावत्कस्नेहपात्रीभूतत्वात् । उदारचरितानां भवादृशां करुणैकावलंबोऽहं सर्वदाऽनुग्राह्य इति सविनयमभ्यर्थये ॥

श्रीमानविक्रमकविराजान्तेवासी<br>
पि० गोपालनायकः ।

FRANKENMUTH, MICH,
*September 2nd* '05.

Dear Sir,

I cannot describe the delight that I feel over those two most precious booklets of yours which I got yesterday. Being the works as well as the gift of an eminent sage of India, these booklets will always remain priceless treasures of my library. Especially do I value the Yogamrita-tarangini ; the subject interests me deeply,.......... ................................ .................... . I thank you a thousand times for your beautiful present.

Yours most truly,
DR. J. J. MEYER (SD.)
Prof. Dept. of Sanskrit,
The University of Chicago, U. S. A.

MANGALORE
22-5-'05.

Respected sir,

I have to thank you with all my heart and soul for your kind presentation of your books. I value, your Advaita-stabaka more than the Sanskrit stotras, not because I love Sanskrit less, but because I love Malayalam more. You have placed the whole Kerala under obligation to you by rendering into Malayalam verse Sri

Rama Githa &c. Still more light is necessary and I humbly request you will favour the public with your exposition of these hard nuts of the blessed Vedanta. .................................. ......

M. SESHAGIRI PRABHU M. A. (Sd.)
Prof. Government College.

August 5 '08.

To

Pandit Birudankita
N. Tirtha Swami.

Dear Sir,

I acknowledge with thanks four Sanskrit books sent by you. I went through the books and found them very useful.

Yours truly,
(Sd.) SADASIVA MISRA,
HEAD PANDIT,
Puri Zilla School,
Puri.

चिद्विलासित्युक्तं तोट्टुवादेवपञ्चकम् ।

अमृतजलकुम्भमुख्यं धृत्वा पितुमातुरान्भुवं यातः । आरोग्यं मम दिशताद्धन्वन्तररूपतोट्टुवादेवः ॥ १ ॥ यद्देवे धृतमतयो नीरुग्भावं प्रयान्ति रुग्णजनाः । हन्यान्मद्रोगान्स हि धन्वन्तररूप० ॥ २ ॥ अत्र भिषक् कस्त्वत्तोऽपर इति जानामि नैव यत्तन्मे । सौख्यं देयात्सभवान्० ॥ ३ ॥ कादलपक्कं दित्सन्यस्मै कादलनमेति नेह जनः । सोऽव्यान्मां करुणाब्धिर्धन्वन्तररूप० ॥ ४ ॥ लोकेशाभिधयोक्तो लोकेशयजनमवत्वनन्त इति । यः प्रार्थ्यते स पायाद्धन्वन्तर० ॥ ५ ॥ चिद्विलासिन्यभिख्याता केपिकात्यात्मजाभिधा । आत्माश्रमगुरोर्लब्धनिष्ठेदं तत्पदेऽकरोत् ॥ ६ ॥ समाप्तम् ॥

Printed by A. C. Chakravarti at the M. S. P. S. Press, Benares,
and published by the Author.